International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(5): 60-63
© 2016 IJSR
www.anantaajournal.com
Received: 12-07-2016
Accepted: 13-08-2016

**सर्वेश कुमार शान्डिल्यः**
शोधच्छात्रः संस्कृतविभागः,
कलासङ्कायः काशी हिन्दू
विश्वविद्यालय

**Correspondence**
**सर्वेश कुमार शान्डिल्यः**
शोधच्छात्रः संस्कृतविभागः,
कलासङ्कायः काशी हिन्दू
विश्वविद्यालय

# महाकविशूद्रकविरचिते मृच्छकटिके प्रेमाख्यानविमर्श

## सर्वेश कुमार शान्डिल्य

**प्रस्तावना**

मानवमनस्पन्दनाय चमत्कारकारकं सर्वोत्कृष्टं साधनं साहित्यं वरीवर्ति महामहीतलेऽस्मिन्। उत्कृष्टसाहित्यं लक्ष्यमवाप्तुं सर्वथैव जागरयति अभिप्रेरयति सर्वोत्कृष्टताञ्च दधाति। विविधभाषापरिनिष्ठितेषु साहित्येषु विशालतमं संस्कृतसाहित्यम् अत्यन्तं वरिष्ठं स्थानं बिभर्ति। सम्पूर्णस्यापि संस्कृतसाहित्यस्यानुशीलनं महद्दुष्करं कठिनञ्चेति विज्ञाः केचित् स्वयमेव प्रमाणयामासुः। तत्र कतिपयानां महतां कवीनां नाटकानि प्रमाणभूतान्यपि सन्ति। यतो हि संस्कृतसाहित्यं तत्रापि नाटकसाहित्यं यादृशं विशालं गभीरं व्यापकञ्चास्ति, यदि विविधेषु नाटकेषु वर्णितानां प्रेमाख्यानानां नामसंकीर्तमेव क्रियते चेत् तर्हि समक्षमस्माकं कश्चन विशालतमो ग्रन्थः समुत्पत्स्यति। परमत्र महाकविभास–कालिदास–भवभूति–शूद्रकादीनां नाटकेषु महाकविशूद्रकस्य मृच्छकटिकस्यापि स्वकीयं विशिष्टमेव महत्त्वम्। एवं तस्मिन् वर्णितस्य प्रेमाख्यानस्य विवेचनमत्यन्तं प्रासङ्गिकतां प्रमुखताञ्च बिभर्ति इदानीम्। प्रेम्णि शृङ्गारस्यास्तीति स्वीयं महत्त्वम्। यथोक्तं भोजदेवेन शृङ्गारप्रकाशे–

> शृङ्गार–वीर–करुणाद्भुत–रौद्र–हास्य–बीभत्स–वत्सलभयानक–षान्तनाम्नः।
> आम्नासिषुर्दषरसान् सुधियो वयं तु, शृङ्गारमेव रसनाद् रसमामनामः।।[1] शृ०प्र०प्र०प्र० 06

शृङ्गारः प्रेम्णः अद्वितीयं कारकम्। कलिकलापेऽस्मिन् प्रेम्णि शृङ्गारस्य संसारः सर्वातिशयतां दधाति। वस्तुतः साम्प्रतिकेन चाकचिक्येन तादृशं वास्तविकं स्वरूपं तावत् संकुचितं विकृतञ्च जातम्। परं तथापि कुत्रचिद् तस्य हार्दिकस्य स्वाभाविकप्रेम्णः चमत्कृतिरूपम् अक्षुण्णमेव।

सर्वप्रथमं तृप्तिः जीवनं तृप्तिकरणञ्च प्रेमपदवाच्यं भवति। इदं प्रेम तृप्तिः तर्पणञ्च। तर्पणं स्वस्यापि परस्यापि भवति। प्रेमतत्त्वमिदम् अतिशयं सुन्दरं मधुरम् आह्लादकञ्चास्ति। इदं प्रेम रमणीषु रागरूपेण, गुरुजनेषु श्रद्धारूपेण, शिशुषु स्नेहरूपेण, ईश्वरे भक्तिरूपेण तिष्ठति। इदं प्रेम क्रियया नोत्पद्यते प्रत्युत निष्पन्नं सञ्ज्ञातं भवति। इत्थं प्रीतिः प्रेम च निरतिशयानन्दे विश्रान्तौ, निरतिशयानन्दस्वरूपश्चात्मैव, आत्मनः सच्चिदानन्दमयत्वात्। अतः परमानन्दस्वरूपात्मैव प्रेमपदार्थः। अत एव नित्यानन्दावच्छिन्नं प्रेम। आचार्यभोजदेवोऽपि व्याजगाद तथाविधमेव शास्वतं स्वरूपं शृङ्गारपदेन–

> शृङ्गारो हि नाम विषिष्टेष्ट–दृष्टचेष्टाभिव्यञ्जकानामात्मगुणसम्पदामुत्कर्षबीजं बुद्धिसुखदुखेच्छाद्वेषप्रयत्नसंस्काराद्य– तिषयहेतुरात्मनो अहङ्कारगुणविषेषः सचेतसा रस्यमाना रस इत्युच्यते।[2]

इदं प्रेम वेदोपनिषत्सु परमतत्त्वरूपेणोपनिबद्धोऽस्ति। लौकिकदशायामेतत् विविधरूपात्मकं सद् आलम्बनभेदात् भेदबाहुल्यमावहति। इत्थं संस्कृतसाहित्ये वर्णितस्य प्रेम्णः स्वरूपं भेदोपभेदाः प्रकारविशेषाश्च विस्तरेण समुपलभन्ते। अस्यैव विविधप्रेम्णः आख्यानं महाकविशूद्रकस्य ''मृच्छकटिकम्'' इति नाटके अनुशीलनपरं साक्षाद्दुद्देशमस्य शोधपत्रस्य। प्रेम इति शब्दः– शब्दशास्त्रे प्रेमशब्दस्य निष्पत्तौ उपादानभूतो धातुः प्री इति। स चायं धातुः प्रीञ् तर्पणे चौरादिकः, प्रीञ् तर्पणे कान्तौ च क्र्यादिकः, प्रीङ् प्रीतौ इति दैवादिकः इति धातुत्रयं दृष्टिपथमवतरति। इत्थं प्रेमशब्दस्य निष्पत्तिः अतिशयेन प्रियः इति प्रेम अथवा प्रियस्य भावः इति प्रियः प्रेमा। अत्र प्रकृतिः प्रिय इति तस्यार्थः तृप्तिकर्त्ता, कामनाकर्ता, प्रीतिकर्ता वा। तत्र प्रकारीभूता तृप्तिः कामनाप्रीतिर्वा प्रेमपदार्थः।

**प्राप्तवैदिकसन्दर्भाः–** वेदा एव समेषां भारतीयज्ञान–विज्ञानानां धर्माणाञ्च मूलं विद्यन्ते। नास्ति तज्ज्ञानं यस्य वेदेषु बीजत्वेन स्थितिः नोपलभ्यते। वेदेषु प्रेम्णः भक्तिरसेऽन्तर्भावः संदृश्यते। तत्रापि सर्वविधप्रेम्णः निदर्शनं भवति। यथा–

> जायासर्वदोषशून्यत्वेन भर्तारं रक्षणार्थं परिव्रजन्ते तथैव मम सर्वस्य लम्भयित्र्यो व्याप्ताः कामयमानतया इदमभिष्टुवन्ति।[3]

इत्यर्थके मन्त्रे तु मत्युपलक्षणेन स्पष्टतया कान्तायाः रतिर्वर्णितास्ति। तस्माद् भक्ताचार्यैः स्वीकृतो मधुरभक्तिरसोऽपि वेदादेव समुद्भूतः। द्वा सुपर्णा सयुजा सखाया[4] इति मन्त्रे जीवब्रह्मणोः सख्यसम्बन्धस्तु प्रसिद्ध एव। अत्रैव उपास्य–उपासकयोः सुस्पष्टं सख्यसम्बन्धो निर्दिष्टः। सहि बन्धुरित्था[5], भवा मित्रो न सेव्यो[6]। व्रजं च विष्णु सखिनी अपोणुते।[7] इत्यादिषु बहुस्थलेषु प्रेयान् भक्तिरसः सख्यभक्तिरसो वा बाहुल्येन स्पष्टरूपेण प्रतीयते।

**लब्धपौराणिकसन्दर्भाः–** वैष्णवानां परमप्रमाणभूते श्रीमद्भागवते महापुराणे परमं प्रतिपाद्यं वस्तु भगवद् भक्तिरेव। स्कन्दपुराणस्य काशीखण्डेऽपि प्रतिपादितं यत् भगवतो नामरसं निपीय भक्तेन निःश्रेयमपि तृणमिव मन्यते इति।[8] एवमेव ब्रह्मवैवर्तपुराणेऽपि विष्णुभक्तिरसं परम्[9] इति। इत्यादिना भगवद् भक्तिरस एव सर्वोत्कृष्टतया प्रतिपादितः। एवमेव बहुविधस्थलेषु पुराणेषु भक्तिविवेचनं लभते।

**रामायणे प्रेमचिन्तनम्–** शृङ्गाररसाभिव्यञ्जने रामरयणं काव्यमिदम् अद्वितीयमिति उदीरयन्ति काव्यरसिकाः सहृदयाः। शृङ्गारचित्रणे रामायणं सर्वदैव मर्यादां रक्षति। सर्वप्रथमं वनगमनकाले म्लानमुखं राममवलोक्य सीता तं वदति, दुःखस्य च कारणं पृच्छति। रामः वनवासक्लेशं वर्णयन् यैः वचनैः सीतां वनगमनान्निवारयति तान्यपि शृङ्गारानुभवरूपाणि, एवं तैः सीतां प्रति रामस्य प्रेम भावो व्यज्यते।[10] एवमेव रामायणे नानास्थलेषु प्रेम प्रकटीभवति रसमुखेन।

**महाभारते प्रेमनिरूपणम्–** महाभारते अनेकेषु कथाप्रसङ्गेषु प्रेम्णः स्थितिः आख्यानञ्च दृश्येते। अस्मिन् सन्दर्भे कच–देवयानी इत्यनयोर्वृत्तान्तं आदर्शभूतं वर्तते। स्वाध्ययनकाले कचस्योपरि असुरगुरोः देवयानी नाम्नी पुत्री आसकाऽभवत्, इत्युदाहरणम्[11]। महाभारतस्य बहुषु कथावस्तुषु प्रेम विप्रकाशते।

**मृच्छकटिके प्रेमाख्यानम्–** मृच्छकटिकम् इति प्रकरणम् इदानीमपि प्राग्भारतीयव्यवस्था–राजनीतिकोत्थानपतनविवेचनदृष्ट्या आलोचकानां बुद्धिविषयतामवतरति। प्रकरणस्य नायकश्चारुदत्तस्तथा हि नायिका वसन्तसेना चेत्युभावपि परस्परं सामाजिकदृष्ट्या पृथग्–पृथगिव स्थानं धारयतः किन्तूभावपि अन्योन्यविषयकप्रेम्णा अभिभूतावास्ताम्। चारुदत्त–वसन्तसेनयोः प्रेम इदं गुणश्रवणात्मकं वर्तते। अर्थात् चारुदत्तस्य सात्विकगुणान्, उदात्तचरित्रञ्च जनैः सुश्रूय स्वाभाविकम् एवमत्यन्तं प्रचलितं सर्वजनसंवेद्यं प्रेम अकरोत्। चारुदत्तोऽपि तस्याः रूपगाथां गुणगौरवञ् श्रुत्वा अनुरक्तः सञ्जातः आसीत्। वस्तुतः तत्र चारुदत्तः उज्जयिन्याः एको धनाढ्यः गुणी, चरित्रवांश्च सार्थवाहो वर्तते तथैव वसन्तसेना अस्यैव नगरस्य सर्वगुणसम्पन्ना अनिन्द्यसुन्दरी यौवना गणिका वर्तते। यथोवाच शूद्रकः मृच्छकटिके–

> अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः।
> गुणानुरक्ता गणिका च यस्य वसन्तषोभेव वसन्तसेना।।[12]

उभावपि अन्योन्यस्य गुणश्रवणावधिरेव परस्परं प्रेम प्रपालयतः। वसन्तसेना कामदेवायतनोद्यानात्प्रभृति चारुदत्ते अनुरक्ता इति स्वयं शकारवचनम्।

> भावभाव! एषा गर्भदासी कामदेवायतनोद्यानात्प्रभृति तस्य दरिद्रचारुदत्तस्यानुरक्ता न मां कामयते।[13] इति

अथ च शकारत्रासान्मुक्तिमनुचिन्त्यमाना यदाऽसौ शकारमुखेन वामस्तस्य (दरिद्रचारुदत्तस्य) गृहमिति शृणोति तदात्यन्तं मोदं परां शान्तिं लभन्ती कथयति–

> वस आष्चर्यं वामस्तस्य गृहमिति यत्सत्यमपराध्यता अपि दुर्जनेनोपकृतं येन प्रियसङ्गमं प्रापिता।[14]

वसन्तसेनायाः प्रथमदर्शने तव स्वयं चारुदत्तोऽपि आत्मगतं प्रेम मनसि स्वीकरोति। आत्मगतं वदति च। तद्यथा–

> अयं मे जनितः कामः क्षीणे विभवविस्तरे।
> क्रोधः कुपुरुषस्येव स्वगात्रेष्वेव सीदति।।[15]

प्रथमसङ्गमे अनयोरुभयोरपि प्रेमिणोः प्रेमभावना निज–निजहृदयेष्वेव तिष्ठति। वसन्तसेना चारुदत्तस्य गृहे बहुकालं स्थातुं न शक्ष्यति इति सा निश्चयेन वेत्ति किन्तु चिरान् मिलितः प्रियतमोऽपि कथं क्षणमात्रेण त्यक्तुं शक्य इति पुनरपि भविष्ये प्रियसङ्गमाकाङ्क्षया स्वकीयान् स्वर्णालङ्कारान् तत्र निक्षिपति।
वसन्तसेनायाः चारुदत्तविषयकप्रेम्णः सम्यग्वर्णनं प्रदर्शनं वा द्वितीयाङ्कारथादित एव सुस्पष्टं परिलक्ष्यते। मदनिकया सह वार्ता कुर्वाणा सा वसन्तसेना तद्विषयकं नैजं हार्दिकं प्रेम प्रकटयति। आत्मानमुपस्थापयति। मदनिकया इदं पृष्टे सति यत्–

> आर्ये! यदि स मनीषितस्तत्किमर्थमिदानीं सहसा नाभिसार्यते।[16]

वसन्तसेना तद् रहस्यं प्रटयति–

> चेटि! सहसा नाभिसार्यमाणः प्रत्युपकारदुर्बलतया मा तावज्जनो दुर्लभदर्षनः पुनर्भविष्यति।[17] इति

वस्तुतः तत्र तस्याः प्रेम्णः हेतुरेकोऽपि दृष्टिं प्राप्नोति। गणिका स्वभावा सा सुप्रथिता समग्रेऽपि सामाजिके व्यवहारे। कदाचित् तासां गणिकानामपि हृदयं स्वाभाविकं स्नेहमाकाङ्क्षते इत्याशयस्य प्रतीतिरपि उद्देश्यं स्यादस्य प्रेमप्रपञ्चनिर्धारणस्य। तत्र वासवदत्ता स्वयमेव स्वोद्गारं स्वहृदयासीनं भावं प्रकटयति। व्यनक्ति च–

> अत एव काम्यते! दरिद्रपुरुषसङ्क्रान्तमनाः खलु गणिका लोकेऽवर्चनीया भवति।[18]

नाटकस्यास्य चतुर्थेऽङ्के पुनः प्रेमिकयाः वसन्तसेनायाः चारुदत्तमभिलक्ष्य कृतो स्नेहव्यवहारसङ्केतः तस्य प्रेमाभिव्यक्तिं प्रस्तौति। यत् यदा वसन्तसेना चारुदत्तस्य चित्रमादाय मदनिकां पृच्छति यत् किमस्य आर्यचारुदत्तस्याकृतिः मत् सौष्ठवयोग्या वर्तते इति, तदा मदनिका तं तस्यानुरूपं घोषिता। एतच्छ्रुत्वा सा वसन्तसेना मदनिकया तर्कयति यत् त्वया कथं ज्ञातमिति। मदनिका उत्तरिता यत् तव दृष्टिः सुस्निग्धया तस्मिन् चित्रे अनुरूपं वर्तत इति। संवादा यथा हि–
वसन्तसेना– चेटि मदनिके! अपि सुसदृषीयं चित्राकृतिरार्यचारुदत्तस्य
मदनिका– सुसदृषी
वसन्तसेना– कथं त्वं जानासि?
मदनिका– येनार्यायाः सुस्निग्धा दृष्टिरनुलग्ना।[19]

उपर्युक्तसंवादाभिधानेन वसन्तसेनायाः चारुदत्तं प्रति हृदयस्थं प्रेम प्रकाशितो भवति। एवं बहुविधरूपेण वसन्तसेनायाः आसक्तेः भानं यथास्थानं भवति। प्रसङ्गवशात् अत्रैव मदनिकाऽपि शर्विलकेऽपि अनुरक्ता दृश्यते तथैव शर्विलकोऽपि मदनिकायाम्। शर्विलकः चौरकार्यं निष्पाद्य वसन्तसेनायाः चेटि मदनिकायाः पार्श्वं सम्प्राप्य निजस्य तां प्रति प्रेमाभिव्यक्तिं करोति।
यद्यपि अस्य नाटकस्य नायकः चारुदत्तः वसन्तसेना सदृशमेव तस्यां सोऽपि अनुरक्तो वर्तते किन्तु चारुदत्ते गणिका वसन्तसेना मुग्धेव समर्पिता वर्तते। आर्यचारुदत्तस्य नामोच्चारणमपि सा अनुगृहीता भवति तथा च हृदि चारुदत्तेनाभिसारस्य मनोरथं पालयति।

अस्मिन्नेव प्रसङ्गे चारुदत्तेन मेलितुं वसन्तसेना यातुं सन्नद्धा भवति तदा मदनिका तां सङ्केतयति–
चेटि– आर्ये! पष्य–पष्य उन्नमति अकालदुर्दिनम्।[20] वसन्तसेना तां बोधयति यद् अधुना कीदृशी अपि परिस्थितिः समुत्पन्ना भवति चेद् अहं न विरमे। यथाहि–
वसन्तसेना–

उदयन्तु नाम मेघा भवतु निषा वर्षमविरतं पततु।
गणयामि नैव सर्वं दयिताभिमुखेन हृदयेन।।[21]

इत्यनेन सा सुनिश्चयेन धिया चारुदत्तेन मिलितुम् इच्छति। तस्यागमनस्य सूचना तत्र विदूषकेन दत्ता तदा तत्र चारुदत्तस्य गणिकां वसन्तसेनां प्रति सम्बोधनमत्र ध्येयमस्ति। यथाहि–
चारुदत्तः–

सदा प्रदोषो मम याति जाग्रतः सदा च मे निःष्वसतो गता निषा।
त्वया समेतस्य विषाललोचने ममाद्य शोकान्तकरः प्रदोषकः।।[22]

ष्एवमुपर्युक्तैः वचनैः चारुदत्तः भूरिशो हर्षं प्रकटयति। अस्यां दशायां चारुदत्तमवाप्तुं कामनया समागता सा शृङ्गारभावं नाटयन्ती चारुदत्तमालिङ्गति। स्पर्शं नाट्यन्प्रत्यालिङ्ग्य चारुदत्तः वदति–
चारुदत्तः–

भो मेघ! गम्भीरतरं नद त्वं तव प्रसादात्स्मरपीडितं मे।
संस्पर्षरोमाञ्चितजातरागं कदम्बपुष्पत्वमुपैति गात्रम्।।[23]

अस्मिन् स्थले मेघमुपालम्भयति विदूषकः–

दास्याः पुत्र दुर्दिन! अनार्य इदानीमसि त्वम्, यदत्र भवतीं विद्युता भीषयसि''।[24]

पुनः चारुदत्तः तं विदूषकं बोधयति–
चारुदत्तः– नार्हस्युपालब्धुम्–

वर्षषतमस्तु दुर्दिनमविरतधारं शतह्रदा स्फुरतु।
अस्मद्विधदुर्लभया यदहं प्रियया परिष्वक्तः।।[25]

अपि च वयस्य–

धन्यानि तेषां खलु जीवितानि, ये कामिनीनां गृहमागतानाम्।
आर्द्राणि मेघोदकषीतलानि, गात्राणि गात्रेषु परिष्वजन्ति।।[26]

अत्रायमाशयः यद् एषा अवस्था महत् सौभाग्यस्य विषयो वर्तते। अस्मिन् नाटके अत्रोभयोः प्रेमसम्मेलनम् अन्तिम एव भवति। अतः परं तयोर्मेलनस्य योजना विफला एव भवति। दुर्भाग्यवशात् वृषभवाहनविभ्रमेण वसन्तसेना राजश्यालकस्य शकारस्य वाहने आरूढा जाता ताञ्च सम्प्राप्य स्वभावतया तां पीडयति। तेन कर्षिता सा चारुदत्तमेवानुसरति। अनेन व्यवहारेण शकारः क्रुद्धः सन् पृच्छति–
शकारः–

दास्याः पुत्रि! दरिद्रचारुदत्तकः सहकारपादपः कृतः, अहं पुनः पलाशो भणितः, किंशुकोऽपि न कृतः। एवं त्वं मह्यं गालीं ददत्यद्यापि तमेव चारुदत्तकं स्मरसि ?[27]

वसन्तसेना उत्तरति–

वसन्तसेना– हृदयगत एव किमिति न स्मर्यते'[28] अत्रापि वसन्तसेना चारुदत्तमेवानुसरति। शकारेण चारुदत्तस्य नामोच्चारणेनाह्लादमनुभवति वसन्तसेना। वदति च–
वसन्तसेना– भण–भण पुनरपि भण श्लाघनीयान्येतान्यक्षराणि।[29] इत्येव नहि शकारेण कण्ठनिष्पीडनकालेऽपि सा मुहुर्मुहुः चारुदत्तं नमस्करोति। यथा हि– नम आर्यचारुदत्ताय इति।[30] अनेन तस्याः समर्पणभावेन वसन्तसेनायाः चारुदत्तविषयकप्रेमाभिधानं नूनमेव प्रासङ्गिकतां वहति।
वस्तुतः प्रकृतनाटके चारुदत्त–वसन्तसेनयोः प्रेमाख्यानमेव प्रासङ्गिकतां भजते। यद्यपि चारुदत्तः पत्नीं धूतामपि स्नेहं प्रकुरुते, किन्तु प्रामुख्येन तस्याग्रहः वसन्तसेनायामेव दरीदृश्यते। कथानके शकारेण पीडितौ वसन्तसेना–चारुदत्तौ उभावपि परिस्थितिवशात् अन्योन्यमनुस्मरतः। दशमेऽङ्के राजश्यालकेन रचितेन षड्यन्त्रेण दण्डाभिधानात् वसन्तसेनया मुञ्चितो चारुदत्तः तस्यै कृतज्ञतामर्पयन् भणति– चारुदत्तः–

त्वदर्थमेतद्विनिपात्यमानं देहं त्वयैव प्रतिमोचितं मे।
अहो प्रभावः प्रियसङ्गमस्य मृतोऽपि कां नाम पुनर्ध्रियेत।।[31]

अपि च– प्रिये! पष्य

रक्तं तदेव वरवस्त्रमियं च माला कान्तागतेन हि वरस्य यथा विभाति।
एते च वध्यपटहध्वनयस्तयैव जाता विवाहपटहध्वनिभिः समानाः।।[32]

एवम्प्रकारेण कथानकस्यान्ते नायक–नायिकत्वेन चारुदत्त–वसन्तसेनयोः पुनर्मेलनं जायते। कविना शूद्रकेन अस्मिन् नाटके वसन्तसेना प्रेम्णः प्रतिमूर्तिरिव प्रस्तुता वर्तते। गणिकायाः प्रेम्णः प्रतिमूर्तिरिव स्वीकृतिः कथमत्यन्तं श्लाघनीया इत्यत्राऽस्ति संदेहः कश्चन। परं महाकवेः आशयवलादिदं स्वीकर्तव्यम् अस्माभिः। अत्रैव पत्न्याः धूतायाः प्रेम अपि ध्यातव्यमस्तीति। यदा लाञ्छनदण्डाभिधानाय नीयमानस्य चारुदत्तस्य सूचनां सम्प्राप्य तद्वियोगजन्यदुःखमनुभवन्ती सा धूता आत्मानं दाहकर्मणि योजयितुमुद्यता भवति। एतद् वृत्तान्तमपि तस्याः चारुदत्तं प्रति प्रेम्णः निदर्शनं कारयति। साकमेव विदूषक–चारुदत्तयोः परस्परस्नेहः अपि सुहृत्प्रेम्णः सात्त्विकं प्रमाणमस्तीति।

**वात्सल्यप्रेमाख्यानम्–** अतः परं चारुदत्त–रोहसेनयोः अन्योन्यस्नेहः रूपकेऽस्मिन् वैशिष्ट्यमुत्पादयति। प्रस्तुते प्रकरणे वात्सल्यस्नेहः निजवैलक्षण्यात् परिज्ञायते। यो हि कयाचिद् गणिकया चारुदत्तस्य पुत्रं प्रति आविर्भूतं वात्सल्यं नूनमेव आह्लादस्य विषयोऽस्ति सहृदयेभ्यः। अत्र वात्सल्यस्नेहयुता वसन्तसेना रोहसेनं दृष्ट्वा सहजतया तं स्नेह्यतुम् उत्कण्ठिता भवति। झटित्येव रदनिकां पृच्छति यदयं कस्य बालकोऽसौ? यद्यपि अस्य शरीरं अलङ्कारविहीनमस्ति तथाऽप्ययं चन्द्रमुखो मम हृदयमाह्लादयति।[33] प्रकरणस्यास्य नायकः चारुदत्तोऽपि स्वीयं वात्सल्यं पुत्रं रोहसेनं प्रति प्रदर्शयति। वात्सल्यचित्रणं भृशं मार्मिकमत्र दृश्यते, इत एव प्रकरणस्यास्य नामकरणमपि समुद्भवति इति।
अस्मिन् प्रकरणे येन प्रकारेण नायक–नायिकयोः प्रेमाख्यानस्य वर्णनस्य प्राधान्यं दृश्यते। तथैवास्य वात्सल्यचित्रणमपि सहृदयेभ्यः तोषाय वर्तते। इति शम्

**सन्दर्भ ग्रन्थ सूची–**


1 शृ0प्र0प्र0प्र0 06
2 शृ0प्र0
3 ऋग्वेदः 10.43.01
4 ऋग्वेदः
5 तत्रैव 1.154.05

6 तत्रैव 1.156.01
7 तत्रैव 1.156.4
8 स्क.पु.का.ख. 74.90
9 ब्र.वै.पु.कृ.ज.ख. 59.64
10 वाल्मीकिरामायणम्
11 महाभारतम्
12 मृच्छकटिकम्, प्रथमोऽङ्कः 6, सम्पादकः प्रो0 जयशङ्करलालत्रिपाठी
13 मृच्छ0 प्रथम0 अं0 पृ0 सं0 80
14 तत्रैव पृ0 81
15 मृच्छ0 प्रथम0 अं0 55
16 मृच्छ0 द्वितीय0 अं0 पृ0 सं0 134
17 तत्रैव
18 मृच्छ0 द्वितीय0 अं0 पृ0 सं0 133
19 मृच्छ0 चतुर्थ0 अं0 पृ0 सं0 232
20 तत्रैव पृ0 सं0 298
21 मृच्छ0 चतुर्थ0 अं0 33
22 मृच्छ0 चतुर्थ0 अं0 37
23 मृच्छ0 चतुर्थ0 अं0 47
24 मृच्छ0 पञ्चम0 अं0 पृ0 सं0 362
25 मृच्छ0 चतुर्थ0 अं0 48
26 मृच्छ0 चतुर्थ0 अं0 49
27 मृच्छ0 अष्टम0 अं0 पृ0 सं0 477
28 तत्रैव
29 तत्रैव
30 मृच्छ0 अष्टम0 अं0 पृ0 सं0 480
31 मृच्छ0 दशम0 अं0 43
32 तत्रैव 44
33 मृच्छ0 षष्ठ0 अं0 पृ0 सं0 371